International Journal of Sanskrit Research 2018; 4(3): 102-104

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(3): 102-104
© 2018 IJSR
www.anantaajournal.com
Received: 26-03-2018
Accepted: 30-04-2018

डॉ. मयंक कुमार झा
ग्रामः पत्रालयश्च–अशोक बिहार, कॉलोनी, चाँदचौरा, मण्डलम्–गया, बिहार, भारत

Correspondence
डॉ. मयंक कुमार झा
ग्रामः पत्रालयश्च–अशोक बिहार, कॉलोनी, चाँदचौरा, मण्डलम्–गया, बिहार, भारत

# ताजिकनीलकण्ठीग्रन्थे सहमविचारः

**डॉ. मयंक कुमार झा**

**प्रस्तावना**

शास्त्राणां पर्यालोचनेन शास्त्रोषु ज्योतिष, ज्यौतिष इति शब्द द्वयोः प्रयोगो लभ्यते। तत्रा ज्योतिः नक्षत्राादयः तान् अधिकृत्य कृतं शास्त्रां ज्यौतिषम्, ज्योतिः शब्दात् शेषे इति सूत्रोण अणि 'यस्येति चेति' अकारलोपे आदिवृद्धौ विभक्तिकार्ये ज्यौतिषम्। ''अर्शादिभ्यो अच्'' [1] इति अचि अनुबन्धलोपे यस्येति चेत्यलोपे विभक्तिकार्ये ज्योतिषम्। इत्थं उभयविध व्युत्पत्या नक्षत्राादीना ज्ञानकरं शास्त्रां ज्योतिशास्त्रामित्युपपन्नम्।

वेदेषु वैदिकसाहित्येषु च सर्वत्रा ज्योतिषशास्त्रास्य सत्ता परिलक्ष्यते। वैदिकयज्ञविधिसम्पादनाय ऋत्वयन लग्नादेः शुभाशुभज्ञानं आवश्यकं मत्वा षड् वेदात्रेषु ज्योतिषशास्त्रास्यापि स्थानं विद्यते।

तत्रा वैदिककालः अथवा प्राचीन भारतीयज्योतिषं वेदात्रेषु ज्योतिषम्, महाभारत स्मृतौ च ज्यौतिषम् आदिकालोत्तरवर्ति ज्योतिषम्, इति कालक्रमेण चतस्रः कालव्यवस्था भारतीयज्योतिषस्य स्वरूपं कर्तुं शक्यते।

अत्रा सहमशब्द ''सहम'' शब्दस्यैवापरोऽपभ्रंशो बोध्यः। यतो हि विशरणगत्यवसादनाद्यर्थक ''षद्लृ'' धातोः धात्वादेः षः सः ''इति षस्य सत्वेदनुबन्धलोपे सीदन्त्यस्मिन्नित्यर्थे'' इति षस्य सत्वेऽनुबन्धलोपे सीदन्त्यस्मिन्नित्यर्थे ''सर्वधातुभ्यो मनिन्'' इति मनिन् प्रत्ययेऽनुबन्धलोपे ''सह्मन्'' इतिशब्दो नान्तो नपंसके निष्पद्यते। तस्य सहम शब्दस्य पारसीकभाषीय दकारस्य हकारे जायमाने सहमशब्दो गृहभावादि वाचकोऽवसेयः।

पुण्यं 1 गुरू 2 र्ज्ञान 3 यशो 4 थ मित्रां 5 माहात्म्य 6 माशा च 7 समर्थता च 8। भ्रता 9 ततो गौरव 10 राज 11 तात 12 माता 13 सुतो 14 जीवित 15 मंबु 16 कर्म 17।।

मान्द्य च 18 मन्मथ 19 कली 20 परतः चमोक्ता 21 शास्त्रां 22 सबन्धुसहमं 23 त्वथ बदकं च 24 मृत्योश्च सद्य 25 परदेश 26 धना 27 न्यदारा 28 स्पादन्यकर्म 29 सवाणिक 30 त्वथकार्यासिद्धिः 31।। उद्वाह 32 सूति 33 सन्तापाः 34 श्रद्धा 35 प्रीति 36 र्बलं 37 तनुः 38।

> जाड्य 39 व्यापारसहमे 40 पानीयपतनं 41 रिपुः 42।।
> शौर्यो 43 पाय 44 दरिद्रत्वं 45 गुरूतां 46 वुपथा भिधम्।। 47।
> बन्धनं 48 दुहिता 49 श्वश्च50 प×चाशत्सहमानिहि।। [2]

अथ सहमानयनमाह। तत्राादौ चतुर्भिः श्लोकैः प×चाश्चात्सहमान्याह।। पुरण्यमिति स्पष्टार्थः।।1।। मान्द्य रोगं।। 2।। 3।। 4।।

> सूर्योनचन्द्रान्वितमह्नि लग्रं वीन्द्वर्कयुक्तं निशि पुण्यसंज्ञम्।।
> शोध्यर्त्क्षशुद्धयाश्रयमान्तराले लग्रं न चेत्सैक भमेतदुक्तम्।। [3]

अथ पुरायसहमसाधनमाह।। सूर्यो नेति।। अह्नि दिवसे वर्षप्रवेशश्चेत्तदा चन्द्रमध्ये रविः शोध्यः। निशि रात्रौ चेत्तदा सूर्याचंद्रः शोध्यः लन्नं योज्यं राश्यादि पुरायसंज्ञं सहमं भवेत्। अथ सर्वत्रा सहमानयने विशेषसंस्कार उच्यते।। शोध्यर्क्षेति।। शोध्यर्क्षशुभ्याश्रयभयोरन्तकाले लग्रराशिश्चेन्नास्ति तदा सहमे एको राशि योज्य इति। तद्यथा। यो ग्रहः शोध्यते न्यूनः क्रियते स शोध्यः। तस्य ऋक्षं राशिः शोध्यग्रहराशेः सकाशादित्यर्थः। शुद्धयाश्रयभं यावत्। तद्यथा यस्मिन् ग्रहे शोध्यो ग्रहः शोध्यते स शुद्धयाश्रयो ग्रहः तस्य भं राशिः अनयोः शोध्यशोधकयोरंतराले मध्ये चेल्लग्रं भवति तदोक्तं राश्यदि पुरायसहमं सैकभमेकराशिसहितं कार्यम्। यदि शोध्य शोधकयो र्मध्ये लंग भवति तदैकराशि र्न योज्य इत्यर्थतः सिद्धम्।। अशोध्यर्क्षशुद्धयाश्रये ग्रहे इत्युफ्लक्षणं भावसहमेपि बोध्यम्।

अग्रे उत्तमस्ति वित्तपमर्थभावादितिपुराणयाद्धौममिति चेत्रागृह ऋक्षभादि भवनं एते राशिपर्यायाल्लग्रमिति योजकोपलशकं ज्ञेयम् उदाहरण। सूर्यः 9/7/30/6 चन्द्रमध्ये 5/22/6/47 शोधितः शेषं 8/14/36/41 लग्रं 0/18/3/54 युतं जातं पुरायं 9/2/4/43/35।।

व्यत्यस्तमस्माद्गुरूविद्ययोस्तु संसाधनं पुण्यवियुक्सुरेज्यः।
दिवा विलोमं निशि पूर्ववत्तु यशोभितं तत्सहमं वदन्ति।। [4]

अथ गुरूविद्यायशःसहमानां साधनमाह। व्यत्यस्तमिति।। अस्मात्पुरायसहजसाधनाद्यत्यस्तं विपरीतं गुरूविद्ययोः सहमयोस्तु संसाधनं कार्यम्। तद्यथा दिवा रविमध्ये चन्द्रः शोध्यः लग्रं योज्यम् रात्रौ वर्षप्रवेशश्चेत्तदा चन्द्रमध्ये रविः शोध्यः लग्रं योज्यम् ते गुरुविद्यासहमे भवतः। पुरायसहमेन वियुक् ऊनः सुरेज्यो गुरूः कार्यो दिवा। निशि रात्रौ विलोमं विपरीत पुरायसहममध्ये गुरू। शोध्यः। पूर्ववदितिलग्रयोगः।। शोध्यक्षेत्यादिसंस्कारश्च सर्वत्रा सहमे कार्यः। तद्यशोभिधं यशः सहमं बुधा वदन्ति। उदाहरणम् रवि मध्ये 9/7/30/6 चन्द्रः 5/22/6/47 शोधितः शेषम् 3/15/20/16 लग्रयुतम् 4/3/24/13 इदमेव विद्या सहमम् 5/3/24/13 पुरायसहमम् 9/2/43/35 गुरूमध्ये 8/29/35/13 शोधिते शेषम् 11/26/51/38 लग्रयुत्तम् जातं यशः सहमम् 0/14/55232

पुण्यसद्य गुरूसतस्त्यजेद् व्यत्पयो निशि सितान्वित च तत्।
सैकता तनुवदुक्तरीतितो मित्रानामसहमं विदु र्बुधः।। [5]

अथ मित्रासहमसाधनमाह। पुरायसद्मेति। दिवा गुरूसद्यतः गुरू सहमतः पुराय सद्य पुरायसहमं त्यजेत्। निशि रात्रौ व्यत्ययोविपरीतं पुरायसहममध्ये गुरूसहमं शोधयेत्। ततः सितेन शुक्रेणान्वितं युक्तं कार्यम्। अत्रा लग्रयोगो न कार्यः। शुकयुक्तत्वात्तनुवत् उक्तरीतितः सैकता कार्या। सा यथा। शोध्यर्क्षशुद्धयाश्रयभांतराले शुक्रो न चेदिति तत् बुधाः मित्रामानसहमं विदुः। उदाहरणम्। पुण्यसहमं 9/2/43/25 गुरूसहममध्ये 5/3/24/13 शोधिते शेषं 8/0/40/38 शुक्रेण 7/24/31/48 युतं सैकं जातं मित्रासहमम् 4/25/12/26 ।

पुण्याद्वौमं शोधयेदुक्तवत्स्या-
महाहात्म्यं तन्नक्तमस्माद्विलोमम्।
शुक्रं मन्दादह्नि नक्तं विलोम
माशाख्यं स्पादुक्तबच्छेषमूह्यम्। [6]

अथ माहात्म्याशासहमयोरनयनमाह।। पुरायादिति। पुण्यसहमाद्‌ौमं शोधयेत् दिवा ततः उक्तवल्लग्रयोगः सैकता च कार्या। नक्तं रात्रौ अस्माद्विलोभं विपरीतं भौममध्ये पुरायसहमं शोध्यत्। तन्माहात्म्यसहमं स्यात्। अथाह्नि दिवसे मन्दाच्छनिमध्ये शुक्रं विशोधयेत्। नक्तं रात्रौ विलोमम्। शुकमध्ये शनिः शोध्यः। शेषं लग्रयो माद्युक्तबदूह्यम् उक्तरीत्या ज्ञेयम्। तदाशासहमभिच्छासहमं स्यात्। उदाहरणम्। पुण्यसहममध्ये 9/1/43/35 भौमे 8/14/32/36 शोधिते शेषम्। 0/18/10/59 लग्रयुतं सैकं जातं माहात्म्यसहमम् 2/6/14/53 शनिमध्ये 6/5/46/54 शुक्रे 7/24/31/48 शोधिते शेषम् 10/12/15/6 लग्रयुतं जातम् आशासहमम् 11/0/16/0।

सामर्थ्यमारात्तनुपं विशोध्य
नक्तं विलोमं तनुपे कुजे तु।
जीवाद्विशुध्येत्सततं पुराचद्
भ्रातार्किहीनाद्गुरूतः सहोह्यः।। [7]

अथ सामर्थ्यभ्रातृसहमयोरानयनमाह। सामर्थ्यमिति। आराद्धौ मात्तनुपं लग्रस्वामिनं विशोध्य दिवसे नक्तं रात्रौ लग्रस्वामिमध्ये भौम विशोधयेत् लग्रयोगः सैकता च पूर्ववत्तत्सामर्थ्यसहमं स्यात्। लग्न स्वामीचेद्धौमस्तदा किंकार्यमत आह– तनुप इति। लग्नस्वामिनि भौमेसति जीवाद्विशुध्येत्। सततं दिवा रात्रौ च तत्सामर्थ्य सहमं स्यात् अथ सदाहोरात्रामार्किहीनात् शनिरहिताद्रुरूतः पुरावत्प्राक्संस्कार – सहितात् भ्राता भ्रातृसहमं स्यात्।। उदाहरणम्। भौमात्तनुपं विशोध्य इत्युक्तम्। अत्रा लग्रस्वामी भौमोस्ति। अतः कारणात् गुरूमध्ये 8/26/35/13 भौमे 8/14/32/36 शोधिते शेषम् 0/15/26/37 लग्रयुतं सैकं जातं सामर्थ्यसहमम् 2/3/31 गुरूमध्ये गुरूमध्ये 8/29/25/13 शनौ 6/6/48/54 शोधिते शेषम् 2/22/46/19 लग्रयुतं सैकं जातं भ्रातृ सहमं 4/10/50/13।।9।।

दिने गुरोश्चन्द्रमपास्य नक्तं
रवि कमादर्कविधू च देयौ।
रीत्योक्तया गौरवमर्कमार्के
रपास्प वामं निशि राजतातौ।। [8]

अथ गौरवराजतातसहमानय नमाह। दिन इति।। दिने दिवसे गुरूमध्ये चन्द्रः शोध्यः रवि र्योज्यः। नक्तं रात्रौ गुरूमध्ये रविः शोध्यश्न्द्रयोगः कार्यः उक्तया रीत्यासैकता च कार्या तत् गौरवसहमं भवति। तद्यथा शोध्यर्क्षशुद्ध्याश्रयभांतराले क्रमेण दिवारात्रौ सूर्यचन्द्रौ न चेत्तदा सैकता कार्येत्यर्थः। दिने वर्षप्रवेशे आर्केः शनिमध्ये अर्के सूर्यं विशोध्य निशि रात्रौ वामं विपरीतं सूर्यमध्ये शनिमपास्य लग्रयोगः सैकता च कार्या राजतातसहमे भवतः। उदाहरणं। गुरूमध्ये 8/29/35/13 चन्द्रे 5/22/9/47 शोधिते शेषं 3/7/25/26 रविणा 9/7/30/6 युतं सैकं जातं गौरवसहमम् 1/14/55/32 शनि मध्ये 6/6/48/54 सूर्यशोधिते 9/7/30/6 शेषं 8/29/28/48 लग्रयुतं जातं राजसहमं 9/17/22/42 तातसहमं च 9/17/22/42।। 10।।

मातेन्दुतोपास्य सितं विलोमं
नक्तं सुतोऽहर्निशामिन्दुमीज्यात्।
स्याज्जीविताख्यं गुरूमार्कितोह्नि
वामं निशीदं सममंबयांबु।। [9]

अथ मातृपुत्राजीविताांबुसमानामानयनमाह। मातेति। दिवसे इन्दुतश्चन्द्रमध्ये सितं शुक्रमपास्य संशोध्य विलोमंनक्तरात्रौ शुक्रमध्ये चन्द्रः शोध्य लग्रयोगः सैकता च कार्या तन्मातृसहमं स्यात्। अहर्निशं दिवारात्रौ वर्षप्रवेशे सति गुरूमध्ये चन्द्रः शोध्यः लग्रयोगः सैकता च कार्या तत्पुत्रासहमं स्यात्। अथाह्नि दिवसे शनिमध्ये गुरूः शोध्यः निधि वामं गुरूमध्ये शनिः शोध्यः लग्रयोगः सैकता च कार्या तज्जीविताख्यं सहमं स्यात्। अम्बया समं च मातुः सहमतुल्यम् अम्बु सहमम् उदाहरणं चन्द्रमध्ये 5/22/47 शुक्रे शोधिते 7/24/31/38 शेषम् 9/27/37/9 लग्रयुतं जातं मातृसहमं 0/15/41/3 गुरूमध्ये चन्द्रे शोधिते शेषं 3/7/25/26 लग्रयुतं सैकं जातं पुत्रासहमं 4/25/ 29/20 शनिमध्ये गुरौ शोधिते शेषं 9/7/23/41 लग्रयुतं जातं जीबिताख्यं सहमम् 9/25/17/35 मातुः सहममेवांबुसहमम् 10/15/41/3।।

कर्मज्ञमारान्निशि वाममुक्तं
रोगाख्यमिन्दुं तनुतः सदैव।
स्यान्मन्मथो लग्रपमिन्दुतोऽह्नि
वामंनिशीन्दुं तनुपं सदार्कात्।। [10]

अथ कर्मरोगमन्मथसहमानामानयनमाह। कर्मज्ञमिति। दिवा भौममध्ये बुधः शोध्यः निशि रात्रौ वामं बुध्मध्ये भौमः शोध्यः लग्रयोगः सैकता च कार्या तत्कर्मसहमं स्यात्। सदैव दिवारात्रौ च तनुतः लग्रमध्ये चन्द्रः शोध्यः लग्रयोगः सैकता च कार्या तद्रोगसहमं स्यात्। दिवसे चन्द्रमध्ये लग्नस्वामी शोध्यः वामं निशि लग्रस्वामिमध्ये चन्द्रः शोध्यः लग्रयोगः सैकता च कार्या तन्मन्मथो मदन स्तस्य सहमं स्यात्।।

इन्दुस्तनुपो लग्नस्वामी चन्द्रश्चेत्तदाऽहोरात्राम् अकल्लिग्नस्वामी चन्द्रः शोध्यः लग्नयोगः सैकताच कार्या मन्मथ सहमं स्यात् उदाहरणाम्। भौममध्ये बुधे शोधिते शेषं 0/2/16/28 लग्नयुतं सैकं जातं कर्मसहमम् 1/20/20/22 लग्नमध्ये चन्द्रे शोधिते शेषं 6/25/54/7 लग्नयुतं जातं रोगसहमम् 7/13/58/9 चन्द्रमध्ये लग्न स्वामिनि भौमे शोधिते शेषं 9/7/37/11 लग्नयुतं जातं मदनसहमं 9/25/41/5।

कलिचमे स्तो गुरूतो विशुद्धे
कुजे विलोम निधि पूर्वरीत्या।
शास्त्रां दिने सौरिमपास्य जीवाद्
वाम निशि ज्ञस्य युतिः पुरावत्।। [11]

अथ कलिक्षमाशास्त्रासहमानामानयनमाह। कलिक्षम इति। दिवागुरूमध्ये भौमः शोध्यः विलोमं निशि भौममध्ये गुरूः शोध्यः पूर्वरीत्येति लग्नयोगः सैकता च कार्या तत्कलिसहमं क्षमासहमं च भवतः। दिने गुरूमध्ये शनिः शोध्यः रात्रौ शनिमध्ये गुरूः शोध्यः अस्य युतिः बुधयोगः कार्यः पुरावदिति शोध्यर्क्षशुद्धयाश्रयभांतराले बुधो न चेत्तद्। सैकता च कार्या। तच्छास्त्रासहमं स्यात्। उदाहरणम्। गुरूमध्ये भौमे शोधिते शेषम् 0/15/2/37 लग्नयुतं सैकं जातं कलिसहमम 2/3/6/31 क्षमासहमं च 2/3/6/21 गुरूमध्ये शनौ शोधिते शेषं 2/22/56/19 बुधयुतं जातं शास्त्रासहममम् 11/5/2/27।।

दिवानिशं ज्ञाच्छशिनं विशोध्य
बन्ध्वाख्यमेतत्रिाशि बन्दकं स्यात्।
वामं दिवैतन्मृतिरष्टमर्त्ता
दिन्दुं विशोध्योक्तवदार्कियोगात्।। [12]

अथ बन्धु बंदकमृत्युसहमानामानयनमाह। दिवानिशमिति दिवा रात्रौ वर्षप्रदेशे सति बुधमध्ये चन्द्रः शोध्यः लग्नयोगः सैकता च कार्या तद्वंधुसहमं स्यात्। निशि वर्ष प्रवेशश्चेंदेतद्वंधुसहमं बंदक सहमं स्यात्। दिव वामं विपरीतं चन्द्रमध्ये बुधः शोध्यः लग्नयोगः सैकता च कार्या तदा बंदकं स्यात्। दिवा रात्रौ वर्षप्रवेश सति। अष्टमर्क्षात् अष्टमभावमध्ये चन्द्रः शोध्यः शनिर्योज्यः उक्तवत्सैकता च कार्या मृतिसहमं स्यात्।। उदाहरणाम्।। बुधमध्ये चन्द्रे शोधिते शेषम् 2/20/6/21 लग्नयुतं सैकं जातं बंधुसहमं 4/8/10/15 चन्द्रमध्ये बुधे शोधिते शेषं 9/9/53/39 लग्नयुतं जातं बन्दकसहमं 9/27/57/33 अष्टमभावमध्ये 7/13/49/30 चन्द्रे शोधिते शेषं 1/21। 39/43 शनियुतं जातं मृत्यु–सहमं 7/28/28/27।

देशान्तराख्यं नवमाद्विशोध्यं
धर्मेश्वरं सन्ततमुक्तवत्स्यात्।।
अहर्निशं वित्तपमर्थभावाद्
विशोध्य पूर्वोक्तवदर्थसद्य।। [13]

अथ देशान्तरार्थसहमयोरानयनमाह।। देशान्तरेति।। सन्ततं दिवारात्रौ वर्षप्रवेश सति नवमात्रावमभावमध्ये धर्मेश्वरं नवमभावस्वामिनं विधोध्य उक्तवल्लग्नयोगः सैकता च कार्या तद्देशान्तरसहस्रं स्यात्। अहर्निशं दिवारात्रौ वर्षप्रवेशे सति अर्थभाबाद्धनभावाद्वित्तपं धनस्वामिनं विशोध्य पूर्वोक्तवल्लग्नयोगः सैकता च कार्या अर्थसहमं स्यात्। उदाहरणं। नवमभावमध्ये 8/9/26/38 नवमभावस्वामिनं गुरूं 8/29/35/13 विशोध्य शेषं 11/9/51/25 लग्नयुतं जातं देशान्तरसहमं 11/27/55/19 धनभावमध्ये 1/13/49/30 धनभाव स्वामिनं शुक्रं विशोध्य शेषं 5/19/17/42 लग्नयुतं जातं द्रव्यसहमं 6/7/21/36।

सितादपास्यार्कमथान्यदारा
ह्वयं सदा प्राग्वदधान्यकर्म।
चन्द्राच्छनिं वाममथो निशायां
शश्वद्वणिज्यं दिनबन्दकोक्त्या।। [14]

अथ परदारान्यकर्मविणक्सहमानामानयनमाह। सितादपास्यार्कमिति। सदाहोरात्रां शुक्रमध्ये सूर्यः शोध्यः प्राग्वदितिलग्नयोगः सैकता च कार्या। अन्यदाराह्वयं सहमं स्यात्। अथ दिवसे चन्द्रमध्ये शर्नि विशोध्य वामं निशायां शनिमध्ये चन्द्रः विशोध्यः लग्नयोगः सैकता च कार्या। अन्यकर्मसहमं स्यात्। शश्वद्दिवारात्रौ दिने बन्दकसहममित्युक्तया रीत्या साध्यं तद्वणिक्सहमं स्यात्। तद्यथा दिवारात्रौ वर्षप्रवेश सति चन्द्रमध्ये बुधः शोध्यः लग्नयोगः सैकता च कार्या वणिक्सहमं स्यात्। उदाहरणम्। शुक्रमध्ये सूर्ये शोधिते शेष 10/17/1/40 लग्नयुतें जातं परस्त्रीसहम 11/5/5/36। चन्द्र मध्ये शनौ शोधिते शेषं लग्नयुतं जातम् अन्यकर्शसहमं 0/3/24/40 चन्द्रमध्ये बुधे शोधिते शेषं 9/8/53/39 लग्नयुतं जातं वाणिक्सहमं 6/27/57/33। 16।।

**संदर्भ**


1. पाणिनीय सूत्राम्।
2. ताजिकनीलकण्ठी, संज्ञातन्त्राम् श्लोकसंख्या – 1–4।
3. तत्रौव, श्लोक संख्या –5।
4. तत्रौव, श्लोकसंख्या – 6।
5. तत्रौव, श्लोकसंख्या – 6।
6. तत्रौव, श्लोकसंख्या – 6।
7. तत्रौव, श्लोकसंख्या – 9।
8. तत्रौव, श्लोकसंख्या – 10।
9. तत्रौव, श्लोकसंख्या – 11।
10. तत्रौव, श्लोकसंख्या – 12।
11. तत्रौव, श्लोकसंख्या – 13।
12. तत्रौव, श्लोकसंख्या – 14।
13. तत्रौव, श्लोकसंख्या – 15।
14. तत्रौव, श्लोकसंख्या – 16।